**आकाशवाणी**

**संस्कृत-वार्ताः**

**दिनाङ्क : 29/11/2025** **सायम् - 06:20**

**मुख्यवार्ताः**

- **प्रधानमन्त्री नरेन्द्रमोदी छत्तीसगढे आयोजितस्य आरक्षि महानिदेशकानां षष्ठितमस्य अखिल भारतीय सम्मेलनस्य अध्यक्षतां विहितवान् ।**
- **प्रशासनेन सोमवासरात् आरभ्य संसदः शैत्यकालिक सत्रात् पूर्वं श्वः सर्वपक्षीयोपवेशनम् आहूतमस्ति।**
- **ऋतुविज्ञानविभागेन उत्तरीय तमिलनाडु, पुडुचेरी, दक्षिणआन्ध्रप्रदेशयोः तटयोः कृते दित्वा नामधेयस्य इत्यस्य चक्रवातमालक्ष्य रक्तसंचेतना प्रख्यापितम् ।**
- **मलयेशियायां सञ्जातायां सुल्तान अजलान शाह हॉकी इति स्पर्धायां भारतीय दलेन कनाडा दलं चतुर्दश - त्रीणि इति अंक अन्तरालैः पराजितम्**

**प्रधानमन्त्री- छत्तीसगढ**

प्रधानमन्त्री नरेन्द्रमोदी छत्तीसगढे आयोजितस्य आरक्षि महानिदेशकानां षष्ठितमस्य अखिल भारतीय सम्मेलनस्य अध्यक्षतां विहितवान् । प्रधानमन्त्री श्वः अपि सम्मेलनस्य अन्तर्गतं निर्धारितविविधसत्रेषु भाग-ग्रहणम् करिष्यति। इदं त्रिदिवसीयं सम्मेलनं ह्यः नवारायपुरस्थ भारतीयप्रबन्धनसंस्थाने आरब्धम् आसीत्। केन्द्रीय गृहमन्त्री अमितशाहः सम्मेलनस्यास्य उद्घाटनं कृतवान्। अवसरे अस्मिन् सः अवदत् यत् एतत् सम्मेलनं आन्तरिकसुरक्षायाः समाधानार्थं परिकल्पितम् अस्ति, यत् रणनीति-नीति-निर्माणयोः कृते व्यापक-सिद्धान्तान् निर्धारयति । श्री शाहः अवदत् यत् देशे विगत- एकादश वर्षेषु कट्टरवादः, अतिवादः, विद्रोहः, मादकद्रव्याणि चेत्यादीनां विरुद्धं अभियानेषु महती प्रगतिः सञ्जातास्ति। केन्द्रीय गृहमन्त्री देशस्य त्रयाणां सर्वोत्तमानां आरक्षि स्थानकानां कृते आरक्षि पदकानि प्रदत्तानि। अस्मिन् वर्षे सम्मेलनस्य विषयः "विकसित भारत, सुरक्षा आयाम" इति अस्ति ।

**शीतकालीन सत्र**

प्रशासनेन सोमवासरात् आरभ्य संसदः शैत्यकालिक सत्रात् पूर्वं श्वः सर्वपक्षीयोपवेशनम् आहूतमस्ति। उपवेशनेस्मिन् संसदीयकार्याणां मन्त्री किरेन् रिजिजुः संसदः उभयोः सदनयोः राजनैतिकदलानां नेतृभिश्च सह मेलनं करिष्यति । उपवेशनेस्मिन् प्रशासनम् सत्रावधौ लोकसभायाः राज्यसभायाः च सुचारुतया संचालनं सुनिश्चितं कर्तुं सर्वेभ्यः राजनैतिकदलेभ्यः सहयोगं याचयिष्यति। एतत् सत्रं दिसम्बर मासस्य प्रथम दिनाङ्कात् आरभ्य दिसम्बर मासस्य ऊनविंशं दिनाङ्कं यावत् प्रचलिष्यति। सत्रावधौ बहवः महत्त्वपूर्णेषु विधेयकेषु चर्चां समेत्य तेषां पारितं भवितुं संभावना वर्तते ।

**ऋतुविज्ञानविभागः**

ऋतुविज्ञानविभागेन उत्तरीय तमिलनाडु, पुडुचेरी, दक्षिण-आन्ध्रप्रदेशयोः तटयोः कृते दित्वा नामधेयं चक्रवातमालक्ष्य रक्त संचेतना प्रख्यापिता । विभागेन दित्वा इत्यस्य चक्रवातस्य उत्तरपश्चिमदिशि प्रति संवर्धनस्य अपि च श्वः प्रातःकालं यावत् तमिलनाडु, पुद्दुचेरी दक्षिण-आन्ध्र-प्रदेशश्च चेत्यादीनां तटानां समीपे सम्प्राप्तस्य संभावना प्रकटिता । विभागानुसारं दित्वा नामधेयं चक्रवातं अद्य अर्धरात्रौ बङ्गप्रदेशस्य दक्षिणपश्चिम-खात्याम् केन्द्रितं भविष्यति। अस्मिन्नेव क्रमे विभागेन श्वः यावत् तमिलनाडु राज्ये तीव्र वर्षायाः सहैव भिन्न - भिन्न स्थानेषु प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति । सममेव तटीय आन्ध्र प्रदेश, यनम, रायलसीमा चेत्येषु क्षेत्रेषु सोमवासरं यावत् तीव्र वृष्टेः संभावना प्रकटिता अस्ति ।

**विमान-महानिदेशालयः**

नागर विमानन-महानिदेशालयेन-डीजीसीए इत्यनेन एयरबस इति समवायस्य ए ३२० इत्यस्याः श्रृङ्खलायाः विमानानां संचालनं प्रभावितया स्थगितम् । एयरबस इति समवायः ए ३१८, ए३१९, ए३२०, ए३२१ चेत्यादीनां विमानानां निरीक्षण-परिष्कारयोः च प्रक्रियायाः अनंतरमेव एतेषां विमानानाम् उड्डयनं कर्तुं शक्ष्यन्ति। एयरबस इति निर्मातृ- समवायः ए३२० श्रृंखलायाः सहस्राणां विमानानाम् परीक्षणस्य आदेशः प्रदत्तः। एयरबस् इत्यनेन ए320 विमानस्य दुर्घटनायाः अनन्तरं एतत् आदेशम् प्रख्यापितमस्ति ।

**निर्वाचनायोगः**

निर्वाचनायोगेन सर्वेभ्यः नागरिकेभ्यः Ecinet app इति चलदूरभाषीय तन्त्रांशं स्थापयितुं समाह्वानं विहितम्। सहैव एतदपि उक्तम् यत् तन्त्रांशं अधिकं उपयोक्तृ-अनुकूलं कर्तुं परामर्शाः दद्युः । नागरिकाः अग्रिममासस्य सप्तविंशतिः दिनांकं यावत् एतस्मिन् तंत्रांशे स्व परामर्शं स्थापयितुं शक्नुवन्ति। आयोगेन उक्तं यत् उपयोक्तृपरामर्शाः परीक्षिताः भविष्यन्ति तथा च मञ्चम् अधिकं उपयोक्तृ-अनुकूलं कर्तुं अधिकाःप्रयासाः भविष्यन्ति। Ecinet इत्यस्य तंत्रांशस्य आधिकारिक विमोचनं अग्रिम वर्षस्य जनवरी मासे निर्धारितम्

अस्ति । ध्यातव्यमस्ति यत् निर्वाचनायोगेन Ecinet app इत्यस्य परीक्षणसंस्करणस्य उपयोगः बिहार-विधानसभा-निर्वाचनसमये कृतमासीत्।

**प्रधानमन्त्री/'मन की बात'-कार्यक्रमः**

प्रधानमन्त्री नरेन्द्र-मोदी श्वः प्रातः एकादशवादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति । मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् अष्टाविंशत्यधिकैकशततमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति । अयं हि कार्यक्रमः आकाशवाणी-वार्ता विभागस्य अन्तर्जालपटले www.newsonair.com इत्यत्र, अपि च

newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शनवार्ता-प्रधानमन्त्रीकार्यालय-सूचनाप्रसारण-कार्यालयानां यू-ट्यूब वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात् प्रसारणं भविष्यति । हिन्दी-भाषायां प्रसारणस्य पश्चात् अस्य प्रसारणम् आकाशवाण्याः क्षेत्रीयासु भाषासु अपि भविष्यति।

**हॉकी**

मलयेशियायां सञ्जातायां सुल्तान अजलान शाह हॉकी इति स्पर्धायां भारतीय दलेन कनाडा दलं चतुर्दश - त्रीणि इति अंक अन्तरालैः पराजितम् ।

**।। इति वार्ताः ।।**